

तिरुमलतिरुपतिदेवस्थानानि

# सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका
फिब्रवरि - २०२५ रु.२०/-

SAPTHAGIRI (SANSKRIT)
SPIRITUAL ILLUSTRATED MONTHLY
Volume:11, Issue: 11
February 2025, Price Rs.20/-
No. of pages-24

**माघेस्मिन्नेव यो देवि! हरं बिल्वेनार्चयते।**
**बालार्कशशियुक्तेन विमानेन स गच्छति।।**

अस्मिन् मासे 19 आरभ्य 28 तिथि पर्यन्तम् श्री कपिलेश्वरस्वामिनां ब्रह्मोत्सवाः।



गोगर्भ डचाम् प्रान्ते 05-12-2024 तिथौ ति.ति.दे. अधिकारिणः प्रत्येकपूजां निर्वाहयामासुः। अस्मिन् कार्यक्रमे ति.ति.दे. धर्मकर्तृमण्डलीसभ्याः श्री शान्तराममहोदयाः, ति.ति.दे. अनुबन्धकार्यनिर्वहणाधिकारणिः श्री सि.हेच्. वेङ्कय्यचौदरि ए.आर्.यस्., महोदयाः भागं गृहीतवन्तः।



09-12-2024 तिथौ धर्मकर्तृमण्डल्यध्यक्षाः श्री बि.आर्. नायुडु महोदयाः श्रवणकेन्द्रं ददर्शुः। अस्मिन् सन्दर्भे अनेन साकं धर्मकर्तृमण्डलीसभ्याः श्री जि.भानुप्रकाशरेड्डि महोदयाः, ति.ति.दे. ति.ति.दे. संयुक्तकार्यनिर्वहणाधिकारिणी श्री यम्.गौतमी ऐ.ए.यस्., महोदया च भागं गृहीतवन्तः।



11-12-2024 तिथौ तमिलनाडुप्रान्ते श्रीरङ्गस्थ श्रीरङ्गनायकस्वामिने ति.ति.दे. कार्यनिर्वहणाधिकारिभिः श्री जे.श्यामलरावु ऐ.ए.यस्., महोदयैः पट्टचा सह पीताम्बराणि समर्प्यमाण मनोहर दृश्यम्।



22-12-2024 तिथौ तिरुमल गरुडाद्रिनगर् काटेजू स्थाने आधुनिकीकृत उपविचारण कार्यालयं ति.ति.दे. कार्यनिर्वहणाधिकारिणः श्री जे.श्यामलरावु ऐ.ए.यस्., ति.ति.दे. अनुबन्धकार्यनिर्वहणाधिकारी श्री सि.हेच्. वेङ्कय्यचौदरि ऐ.आर.यस्., महोदयेन सह प्रारभ्भं चक्रुः। अस्मिन् सन्दर्भे ति.ति.दे. संयुक्तकार्यनिर्वहणाधिकारिणी श्री यम्.गौतमी ऐ.ए.यस्., भागं गृहीतवती। एतत्सम्बन्धमनोहर दृश्यम्।



01-12-2024 तिथौ तरिगोण्डवेंगमाम्बा अन्नप्रसादकेन्द्रे स्थापित कियास्क् यन्त्रं ति.ति.दे. अनुबन्धकार्यनिर्वहणाधिकारी श्री सि.हेच्. वेङ्कय्य चौदरि ऐ.आर्.यस्., महोदयैः प्रारब्धम्। तत्सम्बन्धं मनोहरं दृश्यम्।



17-12-2024 तिथौ ति.ति.देवस्थान तिरुचानूरु अन्नदान भवने ति.ति.दे. संयुक्तकार्यनिर्वहणाधिकारिभिः श्री वि.वीरब्रह्मं ऐ.ए.यस्., महोदयैः स्वयंसेवाकियास्क्यन्त्रस्य प्रारम्भ दृश्यम्।



# गीतामृतम्

श्रीभगवानुवाच -

त्रैगुण्यविषया वेदाः निस्त्रैगुण्यो भवार्जुन।
निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान्।।

यावानार्थ उदपाने सर्वतः सम्प्लुतोदके।
तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः।।

(भगवद्गीता २.४५-४५)

हे अर्जुन! ऋग्यजुस्सामाधर्वणचतुर्वेदाः सत्त्वरजस्त्रमोगुणात्मक संसारविषयान् विवृण्वन्ति। तत्कारणात् त्वं त्रिगुणात्मकविषयेषु वांछारहितः गुणातीतः, शुद्धसत्त्व विशिष्टः सुख दुःखादिद्वन्द्वसहनशीलः योग क्षेमानासक्तः केवलमात्मज्ञानी भव। वेदेषु अधिकभागाः कर्मकाण्डं, वर्णा श्रमधर्मान् अभिव्यक्तीकुर्वन्ति। उपनिषदः गुणातीतशुद्धात्मस्वरूपं उपदिशन्ति। निरतिशयानन्द ब्रह्मप्राप्तिमार्गं बोधयन्ति।

स्नानपानाद्यर्थं जलप्रपूर्णतटाकात् यथा जलं तथैव समस्तवेदप्रतिपादित काम्यकर्मफलानि सर्वाणि आत्मानुभवविशिष्टब्रह्मनिष्टस्य लभ्यन्ते। अयं श्लोकः भक्तेषु करुणया कृष्णेन उपदिष्टःबहवः शास्त्रज्ञानविहीन, यज्ञानाचरण, अकृतयोगाभ्यास, अकृतादनत्वामन्त्रजपतीर्थयात्राः, अस्माकं मोक्षप्राप्तिः कथमिति तप्ताः भवन्ति। तेषां आत्मशान्त्यर्थं उपदिष्टोऽयं श्लोकः। किञ्चिज्जलं, किञ्चिदन्नं क्षुद्दाहबाधानिवारणाय यथा अलं यथा रोगपीडिताय एकमेव युक्तमायुर्वेदौषधमलं तथैव भवरोग विनाशाय निष्ठाप्रपूर्ण ब्रह्मध्यानमलमिति भगवानुपदिशति।

# सङ्कीर्तनम्



नमाम्यहं मानवसिंहं
प्रमदाङ्कमहोबल नरसिहं
दानव दैत्यविदारणसिंहं
नानायुधकरनरसिंहं
भूनभोन्तरा पूरितसिंहं
आनव वह्निलयान्तकसिंहं
प्रलयनृसिंहं बहुमुखसिंहं
सललित गरुडाचलसिंहं

कुलिशनखमुखघोषितसिंहं
तिलकित बहुरविदीपितसिंहं
तिलकित बहुरविदीपितसिंहं
शान्तनृसिंहं शौर्यनृसिंहं -
सन्ततकरुणा जयसिंहं
कान्त श्रीवेङ्कटगिरिसिंहं
चिन्तितघनसंसिद्धि नृसिहम्।

(अन्नमाचार्य आध्यात्मक सङ्कीर्तना)

# प्रत्यक्षदर्शनात्सत्यबोधः

महात्मानामवताराः सर्वजीवसंक्षेमं पुरस्कृत्य आविर्भवन्ति। एकैकस्य प्रयोजनस्य साधनाय सर्वेश्वरः विविधावतारान् धरतीति पुराणवचनम् परित्राणाय साधूनां विनाशाय च दुष्कृतां।

धर्मसंस्थापनार्थाय सम्भवामि युगे युगे इति गीताचर्यवचनम्।

कदाचिदवतार स्वरूप स्वभावैरेव मानवाळेः अमृत सन्देशः लभ्यते। अस्यां सृष्टिवैचित्र्यां मानवाः अभिप्रायभेदैः परस्परं विवदन्तः दृश्यन्ते। अनन्तसृष्टि स्वरूपे भिन्नभिन्नपात्र धारी चिज्योतिः एक एव इत्यवगमयितुमेव भगवान् रुद्राणां शङ्करश्चास्मीति गीतायामात्मस्वरूपं प्रकटयति।

एकादशरुद्र स्वरूपेषु शङ्करः इति कथनात् तात्विकाभेदसाङ्के तिकरूपत्वेन सार्वकालीन समाजाय अमूल्यसन्देश प्रदानत्वं निगूढं भाति।

रुद्रः संहारमूर्तिः लयकारकः तत्तत्त्वस्यापि महोन्नतशिवङ्करकार्यसाधनोपयोगत्वात् शिवः शङ्करः बभूव। कण्ठेकालः सः कालकूटविषं कण्ठगतमात्रत्वेन सर्वलोकसंरक्षणतत्त्वगुणं मानवेभ्यः प्रदर्शयामास। कालकूटसदृशं तापं तात्कालिकतया मानवैरपि कण्ठगतमेव कर्तव्यम्। उदरे कृत्वा देहतापाय समाजविनाशाय कारकैः न भाव्यम्। कालकण्ठस्य चन्द्रशेखरत्वं, गङ्गाधरत्वं, कष्टदशायामपि मानवः बाधोद्वेगरहितः भवितव्यः इति शङ्कर सन्देशः।

दिगम्बरत्वं भोगभूषणत्वं सर्वेश्वरत्वं स्थाणुत्वमित्यादयः शङ्करस्य विषयवैमुख्यं, कठोरदीक्षां, आश्रितवात्सल्यं प्रदर्शयन्ति। गीतायां कृष्णपरमात्मना उक्तः कर्मयोगः अयमेव। मानवः एतद्गुण शतांश साधनेनापि आध्यात्मिकमार्गे पुरोगतः इति वक्तुं शक्यते। स्वार्थं परित्यज्य परार्थं यथाशक्ति साहाय्यं करणीयमिति सामाजिकमौलिकसूत्रं परमशिवादेव सर्वदा ज्ञेयम्।

पर्वतात्परमाणुपर्यन्तं व्याप्तास्य त्रिनेत्रस्य तस्य विश्वरूपसत्यसन्दर्शनाय मानवैः भौतिकवाञ्छादाहक ज्ञाननेत्रं उन्मील्य अन्तर्मुखी कर्तव्यम्। ईश्वरस्य अर्धनारीश्वरत्वं धर्मबद्धैहिक जीवने आध्यात्मिक जीवने च स्त्रीरूपशक्तिस्वरूपरहितः मानवः अपरिपूर्णः एव इति सूचयति। एकः शब्दः बह्वर्थसूचकः मानवश्रेयसे एव इति देवता स्वरूप पुराणनि प्रकाशयन्ति। मानवाः सत्यान्वेषणदृष्ट्या परिशोधनात् अमरत्वस्वरूपमवश्यं ज्ञास्यन्ति। माघफाल्गुणमासयोर्मध्य आगतस्य कृष्णपक्ष चतुर्दश्याः एव शिव रात्रिरिति नाम फिबवरिमासे अस्मिन् २६ तिथौ महाशिवरात्रिरिति निर्दिष्टा। आन्ध्रराष्ट्रे श्रीशैलका लहस्त्रिद्राक्षारामादिपवित्रपुण्यक्षेत्रेषु शिवरात्रिपर्वदिनं महावैभवोपेतया निर्वाह्यते। शिवा मङ्गलकरा रात्रिः शिवरात्रिः शिवाय विष्णुरूपाय शिरूपाय विष्णवे इति कथनात् अभेदरीप्ता शिवकेशवौ आराधनीययौ। भक्ताः उपवासनियमं पालयन्तः नवग्रहपूजादिभिः मुक्ताः भवन्ति। पद्मपुराणस्कान्दपुराणादिषु शिवरात्रिमाहात्म्यं सम्यगभिवणितम्।

कृतोपवासाः ये मर्त्याः शिवमर्चन्ति ये नराः।
बिल्वपत्रं चतुर्मासं ते यान्ति शिवतुल्यताम्।।

# फिब्रवरि -२०२५

सम्पुटिः-११ सञ्चिका-११

स्वस्तिश्री चान्द्रमानश्रीक्रोधिनामसंवत्सर माघशुद्धतृतीयतिथि
शनिवारादारभ्य - फाल्गुणशुद्धप्रतिपति शुक्रवारपर्यन्तम् - २०२४

महाशिवरात्रिमाहात्म्यम् 06
- आचार्य जि.पद्मनाभम्
रथसप्तमी 08
- डा के.कोटेश्वरय्य
परशुरामावतारः 10
- श्रीमति विजय भट्ट
सरस्वतीपूजाविधानम् 11
श्रीशेषाद्रीशस्तुतिः 15
- श्री कन्दाल लक्ष्मीनारायणः
कडप श्रीलक्ष्मीवेङ्कटेश्वरालय ब्रह्मोत्सवाः 17
- डा एम्.ईश्वरम्म
गुरुशुश्रूषया विद्या 19
- डा पि.माधवी
भक्त्या असाध्यं किमपि नास्ति (चित्रकथा) 20
- डा.के.सूर्यनारायणरेड्डि
बालविनोदिनी 22

मुखचित्रम् - श्रीकामाक्षीसमेत श्रीकपिलेश्वरस्वामी, तिरुपति।
अन्तिमपुटः- सरस्वातीदेवी।


## सङ्केतः

प्रधानसम्पादकः,
सप्तगिरिः, ति.ति.देवस्थानानि
तिरुपतिः - ५१७ ५०७.
दूरभाषा - ०८७७ - २२६४५४३, २२६४३५९
सम्पादकः,
०८७७ - २२६४३६०
सूचनानाम्, आक्षेपाणां च कृते
सम्पर्कं कुर्वन्तु -
sapthagiri.helpdesk@tirumala.org


एका पत्रिका : रू.२०/-
वार्षिकग्राहकत्वम् रू.२४०/-
आजीविक ग्राहकत्वम् रू.२४००/-

*वेङ्कटाद्रिसमं स्थानं*
*ब्रह्माण्डे नास्ति किञ्चन ।*
*वेङ्कटेशसमो देवो*
*न भूतो न भविष्यति ॥*


तिरुमलतिरुपतिदेवस्थानम्

# सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका





गौरवसम्पादकः:-

श्री जे.श्यामला राव, I.A.S.,

कार्यनिर्वहणाधिकारी

ति.ति.देवस्थानानि

प्रकाशकः - प्रधानसम्पादकः
डा॥के.राधारमणः,
M.A., M.Phil., Ph.D.,P.G.Dip.in Epigraphy, Dip. in Yoga

सम्पादकः -

डा॥ वि.जि.चोक्कलिङ्गम्, M.A., Ph.D.,

मुद्रापकः - श्री पि.रामराजु, M.A.,

प्रत्येकाधिकारी,

ति.ति.दे.मुद्रणालयः,

तिरुपतिः।

मुख्यछायाचित्रग्रहणम् - श्री पि.एन्.शेखरः,

छायाचित्रग्राहकः, ति.ति.दे.

श्री बि.वेङ्कटरमणः,

सहायक-छायाचित्रग्राहकः, ति.ति.दे.





सूचना
मुद्रितलेखानां विचाराः लेखकानामेव।
एतद्विषये अस्माकं दायित्वं नास्ति।
*– प्रधानसम्पादकः*



# महाशिवरात्रिमाहात्म्यम्

- आचार्य जि.पद्मनाभम्
चरवाणी -९२४७३२८२८६

भारतीयाः वैदिकवाह्ययानन्तरं पुराणवाङ्ग्यस्य प्राधान्यं ददुः। पुराणानि अष्टादश उपपुराणानि च अष्टादश व्यासमहर्षिणा विरचितानि। अष्टादशपुरणेषु कानिचित् ब्रह्माधिक्यं कानिचित् विष्णवाधिक्यं कानिचिच्छिवाधिक्यं प्रदर्शयन्ति। शक्तिपुराणे देवीभागवते शक्तेराधिक्यं दृश्यते। व्यासः सर्वमतशाखागौरवेण समानप्रधान्यं ददौ। यजुर्वेदे शिवस्तुति स्तोत्राणि सन्ति। लिङ्गस्कान्दपुराणेषु शिवसम्बन्धानेकाशा परिपूर्णतया दृश्यन्ते। तत्र शिवरात्रयंशः अतिप्रधानः। भारतीयानां महापर्वसु महाशिवरात्रि माघमासे कृष्णपक्षे अर्धरात्रिव्यापकचतुर्दश तिथौ इदं पर्व प्रारभ्यते कृष्णचतुर्दशी तिथयः मासशिवरात्रयः इति व्यवहरन्ते। संवत्सरे द्वादश मासेषु माघबहुल चतुर्दशी, शिवस्य महाप्रीतिकरा। अतएव शिवरात्रिषु माघशिवरात्रिरेव महाशिवरात्रिरिति व्यवह्रियते। नित्याराधनोद्दिष्टा नित्यशिवरात्रिः। पक्षे शिवार्चनो द्दिष्टा पक्षशिवरात्रिः। पक्षेपक्षे शिवार्चनो द्दिष्टा पक्षशिवरात्रिः। मासे मासे शिव पूजोद्दिष्टा मासशिवारात्रिः। मासे मासे शिवपूजा न कृता चेत् वर्षे एकवारमपि महाशिवरात्रिपूजा कर्तव्या। योग माहात्म्येन योगनिनिद्रा प्रदायक रात्रिः योगशिवारात्रिः। रात्रौ देवी पूजा दिवा देवपूजाचरणं आचारः। परन्तु एवद्विरुद्धत्वेन रात्रावेव शिपूजा अद्य प्रवर्तन्ते। २६-०२-२०२५ शिवरात्रौ पर्वदिनं निर्दिष्टम्। सृष्टिस्थिबलयाकर्तारः ब्रह्मविष्णु महेश्वराः कदाचित् प्रलये आगते सर्वे जीवाः अणुरूपे सुवर्णरेणवः इव अन्तराळे, स्थिताः। लोकहितार्थं रात्रिन्दिवकल्पनया जीवोद्धरणं कर्तव्यमिति पार्वतीप्रथनया शिवः दिवारात्रीः कल्पयामासरात्रावेव शिवपूजाचरणात् समस्तपापनाशात् पुण्यप्राप्तिर्भवेदिति शिवाद्वरं पार्वती प्राप।

प्रलयकाले दीर्घकालरात्रौ पार्वतीकृत शिवपूजा, प्रलयानन्तरे शिवरात्रिपूजेव परिणता। शिवरात्र्यागमनाय ईशान संहितायां कथैवं वर्तते। शिवः अर्धरात्रिवेळायां कोटिसूर्यसमप्रभाभिः लिङ्गाकारे उद्भूतः इति शिवरात्रिनाम, आगतमिति वदन्ति। अर्धरात्रिः लिङ्गोद्भवकालः। महाशिवरात्रिव्रताचरणविधानं लिङ्गपुराणे सम्यक् विवृतम्।

शिवरात्रौ दिवा उपवासः। रात्रिजागरणं लिङ्गार्चनं विधत्तम्। उपवासजागरण लिङ्गार्चनं विधत्तम्। उपवासजागरण लिङ्गार्चन रूपशिवरात्रिव्रतं फलदायकमिति व्रतग्रन्थोक्तिः।

शिवरात्रेः पूर्वदिने एक वारमेव भोक्तव्यम्। पवित्रस्थले रात्रौ निद्रया कालक्षेपः, शिवरात्रौ अरुणोदये स्नानं शिवालये शिवदर्शनं रात्रौ जागरणं, चतुर्यामेषु पूजाविधानमपि भिन्नमेव भवति। प्रथमयामे क्षीराभिषेकः, पद्मैः पूजा, पुलकेनशिवस्य नैवेद्यं ऋग्वेदमन्त्रपठनं विधत्तम् द्वितीययामे, दध्ना अभिषेकः, तुलसीदलैः शिवपूजा, पायसेन नैवेद्यं, यजुर्वेदमन्त्रपठनं विधत्तम्।

तृतीयामे घृताभिषेकः, बिल्वदलैः शिवपूजा, तिलमिश्रित पदार्थैः नैवेद्यं सामवेदमन्त्रपटनं विधत्तम्। चतुर्थयामे मधुना अभिषेकः, नीलोत्पलैः पूजा, केवलमन्नेन नैवेद्यं अथर्वणवेद मन्त्रपठनं विधत्तम्। चतुर्थामेषु वारचतुष्टयं शिवपूजा शिवालयं गत्वा पूजादिधानं विधत्तम्। शिवारात्रौ यात्रिकै महाशिवरात्रिः माघकृष्णचतुर्दश्यां निर्वाह्यते। तिथिमास सम्बन्धोऽयमंशः शिवरात्रिः कदा आचरणीया इत्यस्मिन् विषये, प्रायशः दिवा देवपूजाः रत्रिः देवीपूजानां सर्वश्रेष्टमिति वदन्ति। शिवरात्रि नाम्नैवरात्रिपूजानिदिष्टा। एतत्सम्बन्धिनी कथा इत्थं

वर्तते। सृष्टिस्थितिलयेषु लये सर्वमेकं भवति। गाढान्धकारः व्याप्तो भवति। निम्नोन्नतमपि ज्ञानुमशक्यतया सर्वं जलमयं भवति। कदाचत्प्रलयवेलायां जीवाः अणुरूपे सुवर्णरेणुषु स्थिताः आसन्। तदा तपसा पार्वती शिवं त्रोषयित्वा रात्रिन्दिवकारक -सूर्यचन्द्रोद्धरणाय प्रार्थयामासः। शिवस्य अङ्गीकारात् तुष्टा पार्वती कृतज्ञाताविष्करणाय शिवपूजाञ्चकार। अन्यानपिशिवपूजानिर्वहणाय प्रोत्साहयामास। शिवपूजा निर्वाहकानां समस्तसैख्यानि सिद्धेयुरिति वरमपि दत्तवती। प्रलयानन्तरं शिवरात्रौ क्रियमानपूजात्वात् शिवरात्रिरिति नाम रूढं बभूव।

केचित् पूर्णिमायां शिवः कोटिसूर्यप्रभाभिः लिङ्गाकारे उद्‌बभूवेति तत्समयः रात्रिवेळेति कारणात् महाशिवरात्रिनाम आगतमिति वदन्ति।

शिवरात्रावुपवासः एकः सदाचारः। प्रायशः अन्यपर्वसु मृष्टान्न भोजनादीनि प्रवर्तन्ते। परन्तुशिवरात्रौ उपवास एव मुख्यमिति उपवास नियमानधिकृत्य लिङ्गपुराणे विस्तृतया वर्णितम्। अतः शिवरात्रिः उपवासपर्वदिनमिति वदन्ति।

शिवपूजायां अभिषेकः प्राधानाशः। ‘‘अलङ्कारप्रियोः विष्णुः अभिषेकप्रियो शिवः’’ इति महतां वचनम्। अतः उत्साहवन्तः भक्ताः महान्यास पूर्वकैकादशरूद्राभिषेकं कुर्वन्ति। महाशिवरात्रौ बिल्वार्चनं प्रधानम्। विनायकस्य दूर्वा इव, विष्णेः तुलसीव, शिवस्य बिल्वदलार्चनं प्रधानम्। अतः कोटिबिल्वार्चनं महाशिव रात्रौ निर्दिष्टम्। अयमुत्सवःगृहे वा आलये वा आचरणीयः। शिवरात्रिपूजायां पूजामधिकृत्य शिवस्कान्दपुराणे विशिष्टा चर्चितम्। श्रद्धासक्तिविश्वासयुतैः भक्तैः शिवपूजा शास्त्रोक्तरीत्या समाचरणीया।

शिवरात्रौ लिङ्गपूजासम्बन्धिनी अव्याकथा वर्तते। ‘‘पर्वाणि-पुरुषार्थश्च’’ इत्यस्मिन् ग्रन्थे एवमुक्तम्।

दक्षयज्ञे सतीदेवी शरीरं तत्याज। तदा शिवः बाधानिमिग्नः दिगम्बरदेहेन अटतिस्म। तदटने शिवः ब्राह्मणपट्टणमेकं प्राप। शिवसौन्दर्यमुग्धाः ब्राह्मण स्त्रियः तस्मिन् मोहपरवाशाः आसन्। ब्राह्मणाः तद्विषयं ज्ञात्वा शिवः लिङ्गहीनः भवतु इति शशापुः। तदा अनेकोत्पाताः प्रदुर्भूताः। तदा ब्रह्मादिदेवताः शिवं शरणं प्रापुःतदा शिवः लिङ्गपूजा कर्तव्येति नियमं विदधे। ततः ब्रह्मेन्द्रदिभिरपि शिवलिङ्गपूजाचरणात् अन्येऽपि सर्वे लिङ्गपूजां प्रारब्धवन्तः इति कथा वर्तते। शिवरात्रौ लिङ्गपूजायाः प्राधान्यमिति बहुमतम्। ब्रह्मविष्णवोः कः अधिकः इति तयोरेव कलहः प्रारब्धः। तस्मिन् समये शिवः तयोर्मध्ये लिङ्गाकारेण प्रादुर्बभूव। ब्रह्मविष्णू उभावपि आश्चर्यचकितौ स्वमूर्खत्वं विज्ञाय परस्परकलहाद्विरक्ताविति शिवपुराणकथा वर्तते। अर्धरात्रौ ब्रह्मविष्णुम्यां अधिकभक्तैःपूजाचरणात् रात्रिपूजायाः प्रामुख्यमधिकं बभूव। शिवात्परं नस्तीति प्ररूढिरप्यागता। इमं सन्निवेशमाधारी कृत्य लिङ्गोद्‌भवभावनायाः बलमधिकं जातम्अयमंशः पद्मपुराणे सुधर्मकथाद्वारा विशदीकृतम्।

स्वभार्यया तिलोत्तमया शिवशिवेति शिवनामोच्चारणात् कस्यचित् राज्ञः पूर्वजम्मस्मृतिरागता। पूर्वजन्मनि अहं वैश्यः इति दुर्बुद्ध्या चोरः अभवमिति चौर्यकेर्माचरणालोचने एव सर्वारात्रिः परिसमाप्तेति तद्रात्रेरेव शिवरात्रित्वात् तत्पुण्यविशेषादद्य राजा अभवमिति कथयन् -

कर्मणा तेन रात्रिजागरणेन अचौर्येण राजाहं अभवमित्युवाच अयमंशः जिज्ञासां वर्धयति। प्रायशः व्रताचरणप्रोत्साहाय अपमार्गस्थान् आस्ति रुद्र पथै नेतुं प्रोत्साहकतया अन्येऽपि व्रतफलमनु -भविष्यान्तीति बह्व्यः कथाः प्रचारे वर्तन्ते। तत्र शिव रात्रिजागरण कथाद्वयमेवं वर्तते। विन्ध्य पर्वते एकः मृगयाव्यापारेण कालं यापयति स्म। कदाचित् मृगयाव्यापारेण तस्य सायंसमयः बभूव। सर्वत्र अन्धकारः व्याप्तः। सः रक्षणार्थं बिल्ववृक्षमदिरुह्य काल क्षेपार्थं बिल्ववृक्ष पत्राणि अधःस्थ शिवलिङ्गोपरि अनुद्देश पूर्वकं अनालोचिततया पातयामास। रात्रौ किम्प्यभुक्त्वा जागरणंकार च। अप्रयत्नेनैत शिव। हर! शङ्कर इत्युच्चन्नासीत् तद्रात्रिः शिवरात्रिः। अनुद्देश तथैव शिवलिङ्गपूजा शिवलिङ्गार्चना शिव नामोच्चरण जागरणफलात् - रात्रौ जलपानागत हरिणानां अहननात् पापविनाशक -पूर्वपुण्यं तस्य लब्धम्। एवं महाशिवरात्रिफलेन सह तस्य परमशिवः कैलासे स्थानं ददौ।

**ब्रह्ममुरारिसुरार्चितलिङ्गं निर्मलभासित शोभितलिङ्गं।**
**जन्मजदुःखविनाशकलिङ्गं तत्प्रणमामि सदाशिवलिङ्गम्।।**

# रथसप्तमी



- डा.के.कोटेश्वरय्य
चरवाणी - ९९८५१२३२६२

हैन्दवै भक्तिश्रद्धाभ्यामाचर्यमाणतिथिप्राधान्यपर्वसु रथसप्तमी एका। इदं माघशुद्धसप्तमी पर्वदिनमिति पञ्चाङ्गकर्तुभिः व्यवह्रियते। माघं नाम (मा-अघं) पापरहितमिति विशेषार्थः। अस्मिन् मासे प्रवर्तमानानि सर्वाणि पर्वाणि मानवाळेः धार्मिक तत्परतां आध्यात्मिकासक्तिं वर्धयन्ति। एषु भीष्मैकादशी व्यक्तिप्राधान्यं द्योतयति। महाशिवरात्रिः शिवसम्बन्धिनी। विश्वकर्म जयन्ति नैपुण्याभिवृद्धिं प्रोत्सहति। अस्मिन् मासे तमिलनाडुप्रान्ते कुम्भकोणे निर्वाह्यमान महामाघी लक्षाधिकभक्तानाकर्षयन् प्राचुर्यं वहति।

रथसप्तम्याः वैशिष्ट्याय वहूनि कारणानि सन्ति। पञ्चाङ्गकर्तुभिः रथसप्तमी सूर्यजयन्ति इति, रसपुत्राः रथसप्तमी उगादि इति भावयन्ति। आश्राणां कदाचिदिदं उगादि पर्व आसीत् कर्णाटकदेशायानां "रथसप्तमी" संक्रान्तिसमम्। केचित् रथसप्तमी जयन्तिसप्तमीति महासप्तमीति भावयन्ति। अस्मिदिने सूर्यरथप्रतिमादानं नियतमासीत्। कर्णाटकदेशीयाः एकस्मिन् पीठे रङ्गवल्लीभिः रथाकारं निर्मीय सेवन्ते।रथस्य द्वादश चक्राणि द्वादशराशिसूचकानि राशिचक्रं ३६० डिग्री। सूर्यस्य स्वगृहं सिंहराशिः। सूर्यस्थ द्वादशवारं परिभ्रमणाय ३६० दिनानि आवश्यानि। सूर्यस्य शक्तिकान्तेः विश्वव्यापकत्वं रथसप्तमी सूचयति। अदितिकश्यपयोः पुत्रः सूर्यः। अतः जन्मदिने सूर्यजयन्तिं निर्वहन्ति। काम्भोजस्य राजा यशोवर्मा स्वपुत्रस्य प्राणापायस्थितौ रथसप्तमी पूजा विधानात् स्वस्थः सञ्जातः इत्यैतिह्यम्। सप्तश्शवाः सप्तवारसंङ्केताः। सूर्यस्य एकैकस्मिन् राशौ गमने मित्र, रवि, सूर्य, भग, पूष, हिरण्यगर्भ, मरीचि, आदित्य, सविता इति द्वादश नामानि। रथसप्तमीतिभ्यारभ्य एव सूर्यगमनं प्रारभ्यते। रथसप्तमी सूर्यग्रहण तुल्यं सम्भाव्य पितृदेवऋषिभ्यः तर्पणानि देयानि। सूर्योपासनया रोग, शत्रुविनाशत्वात् सन्ध्यावन्दन सूर्यनमस्कारार्ध्यप्रदानानि प्रवर्तन्ते।

रथसप्तम्यां सामान्यजनाः सप्तार्कपत्राणि वा सप्तबदरी पत्राणि वा द्विविद्यानि वा शिरसि निक्षिप्य स्नानं कुर्वन्ति। अस्यां रथसप्तम्यां सूर्यनारायणमूर्तिं -

**नमस्ते रुद्ररूपाय रसानां पतये नमः।**
**अरुणाय नमस्तेऽस्तु हरिदश्व नमोऽस्तु॥**

इत्याराधयन्ति। एवं सप्तविध पापपरिहारार्थं संकल्पमन्त्रेण स्नानमाचरन्ति। अन्ते "सप्तसप्तिवह प्रीत! सप्तलोकप्रदीपना! सप्तमीसहितोदेव गृहाणार्घ्यं दिवाकर! इति अर्घ्यं प्रददति।

जननी सर्वलोकानां सप्तमी सप्तसप्तिके!
सप्तव्याहृतिके देवि! नमस्ते सूर्यमण्डले!

इति मन्त्रं पठन्ति। अस्मिन् वर्षे ४.२.२०२५ रथ सप्तमी तिथिः। वैष्णवालयेषु निर्वाह्यमानाऽयमुत्सवः केवलकुटुम्बवंश प्रान्तसम्बन्धि न भवति। वैष्णवालयेषु माडवीथीषु सूर्यरथं प्रचलत् भक्तजनतोषकं भवति।

अष्टोत्तर, शततिरुपतिषु तिरुमलक्षेत्रे अयमुत्सवः वैभवोपेततया सूर्योदयादेव प्रारम्भते। सप्तम्यां उत्सववरः श्रीनिवासः, आदौ सूर्यप्रभवाहने सञ्चरति। तिरुमल माडवीथीषु मेदरमिट्टसमीपे सूर्यकिरणेषु प्रसरत्सु सहस्रसूर्यकान्तिभिः स्वामी प्रकाशते। ततः अल्पशेषवाहनं, गरुडवाहनं, हनुमद्वाहनं प्रचलति। ततः चक्रस्नानं स्वाभिपुष्करिण्यां प्रवर्तते। पश्चात् स्वामी कल्पवृक्षवाहने सर्वभूपालवाहने चन्द्रप्रभावाहने सञ्चरन् परिभमति। सूर्यप्रभावाहनादारब्धा वाहनसेवा चन्द्रप्रभावाहनसेवया परिसमाप्तिमेति सप्तवाहनेषु स्वामिनः सञ्चारभ्रमणमेव विशेषः। सप्तगिरिनाथः सप्तलोकपालकः सूर्यचन्द्रनेत्राभ्यां रथे सञ्चरति।

वर्षे वर्षे ब्रह्मोत्सवदर्शनभाम्यरहिताः अस्यां रथसप्तम्यां एकदिनब्रह्मोत्सवः इति सम्भाव्य दर्शनेन पुनीताः भवन्ति।

न केवलं तिरुमलक्षेत्रं, तिरुपति गोविन्दराज स्वाम्यालयोत्सवभागत्वेन रथसप्तम्युत्सवः प्रवर्तते। तिरुचानूरु पुण्यक्षेत्रे पद्मसरोवराभिमुखसूर्यनारायण स्वामिने रथसप्तमीतिथौ पुष्पसेवानिर्वाहः विशेषः। तिरुमल श्रीनिवासः महालक्ष्म्यनुग्रहार्थं पद्मसरोवरे स्वर्लोकादानीत सहस्रदलपद्मस्य नित्यविकासार्थं सूर्यनारायणमूर्तिं प्रष्ठिापयामासेति पद्मपुराणवचनम्।

एवं वेङ्कटेश्वरः पद्मावतीं वोढुं संसिद्धः वैकुण्ठलक्ष्म्याः अनुमत्या विना विवाहः अनुचितः इति कोल्हापुर लक्ष्म्यानयनाय सूर्यं भगवन्तं वार्तावाहकत्वेन प्रेषणं तरिगोण्डवेंगमाम्बारचित श्रीवेङ्कटाचलमाहात्म्ये वर्णितम्। रथ सप्तमीतिथौ अरसविल्लिकोणार्ककालये निर्वाह्यमानसूर्यपूजा खण्डखण्डान्तरेषु प्रसिद्धा। बहुषुप्रदेशेषु सूर्यालयेषु रथसप्तम्युत्सवाः नयनानन्दकरतया प्रवर्तन्ते। सूर्यनारायणः कर्मसाक्षी प्रत्यक्षदैवं, चराचरप्रकृत्युत्तेजकः।सूर्येण विना इदमन्धं नमः कृत्स्नं जायेत भुवनत्रयम्"

**उदयगिरिमुपेतं भास्करं पद्महस्तं**
**सकलभुवननेत्रं नूत्नरत्नोपमेयं।**
**तिमिरकरमुगेन्द्रं बोधकं पद्मिनीनां**
**सुरवरमभिवन्द्यं सुन्दरं विश्वरूपम्॥**

**ज्योतिस्वरूपमघसञ्चयनाशकञ्च**
**तापूत्रयान्तकमनन्तशुभप्रदञ्च।**
**कालात्मकं ग्रहगणेन सु सेवितञ्च**
**श्रीभास्करं भुवनरक्षकामश्रयामि॥**

**सिद्धैस्सिद्धान्तमिश्रंश्रितविधिविबुधैश्चारणैश्चाटुगर्भं**
**गीत्या गन्धर्वमुख्यैर्मुहुरहिवतिभिर्यातुधानैर्यतात्म।**
**सार्धंसाध्यैर्मुनीद्रैर्मुदिततममनोमोक्षिभिः पक्षपातात्**
**प्रातः प्रारभ्यमाणस्तुतिरवतुरर्विश्ववन्द्योदयो वः॥**

**भासामासन्नभावादधिकतरपटोश्चक्रवालस्य तापात्**
**छेदादच्छिन्नगच्छत्तुरगखुरपुटन्यासनिश्शङ्कटङ्कैः**
**निस्सङ्गस्यन्दनाग्रभ्रमणनिकषणात्पातुवस्त्रिप्रकारं।**
**तप्तांशुस्तत्परीक्षावर इव परितः पर्यटन्हाटकाद्रिम्॥**



# परशुरामावतारः

आसीत् पुरा अत्रिमुनेः पुत्रः दत्तात्रेयनामधेयः कश्चित् मुनिः। तस्य माता अनसूयादेवी। दत्तात्रेयः श्रीकृष्णभगवतः अवतारः इति मन्यन्ते। शिष्यैः परिवृतः दत्तमुनिः पत्न्या साकं सर्वत्र अटन् दृष्टिगोचरे आगतवते भक्तहेहयराजकार्तवीरार्जुनाय अष्टैश्वर्यसिद्धिं प्रादात्। अपि च तस्य मरणं स्वहस्तेन एव भवेत् इति वरं दत्तवान्।

अतः दत्तमहामुनिः कार्तवीर्यार्जुनाय दत्तं वरं पूरयितुम् अपि च भूमौ दुष्टजनानां दुष्टशक्तेः नियन्त्रणार्थं प्रदोषकाले अक्षयतृतीयादिने भृगुकुले जमदग्निरेणुकायोः पुत्रो भूत्वा रामनाम्ना अवततार। तस्य भ्रातरः चत्वारः आसन्। यदा रामः चतुर्दशवर्षीय आसीत् तदा तेन वेदाः समे अधिगताः आसन्।

एकदा माता रेणुका नद्याम् अप्सरोभिः सह क्रीडन्तं गन्धर्वराजं पश्यन् होमवेलां विस्मृतवती। गन्धर्वराजेन आकृष्टा अस्ति पत्नी इति ज्ञात्वा जमदग्निना तस्याः वधार्थं पुत्राः आदिष्टाः। परन्तु रामस्य भ्रातरः तस्याः वधं कर्तुं न अङ्गीकृतवन्तः। ''भ्रातरः मे आदेशं न परिपालितवन्तः'' इति क्रुद्धः पिता मातुः भ्रातृणां च वधं कर्तुं रामम् आदिष्टवान्।



तदानीं राम : - ''ज्ञानी अस्ति पिता। अतः आदेशं परिपालयामि'' इति तस्य आदेशं शिरसा वहन् मातुः भ्रातृणाञ्च शिरश्छेदनम् अकरोत्। तस्मात् सन्तुष्टेन पित्रा ''वरं याचस्व'' इति उक्ते झटिति रामः मातुः भ्रातृणां च जीवदानं प्रार्थितवान्।

तदनु रामः पितुः आदेशात् हिमालयं गत्वा शिवम् आराध्य परशुं प्राप्य परशुरामः इति प्रसिद्धः जातः। अनन्तरं शिवेन उक्तान् असुरान् सर्वान् मारयित्वा सः इतोऽपि महास्त्राधिकम् अधिगतवान्। तस्मात् परशुरामः अकृतव्रणमुनेः मित्रत्वं प्राप्य आश्रमम् प्रत्यागच्छत्।

तावता मातरं तोषयितुं भृगुमुनिना कामधेनुः रेणुकायै दत्ता आसीत्। आखेटार्थं गतः कार्तवीरार्जुनः भृगोः आश्रमम् यदा अगच्छत् तदा मुनिना कामधेनोः साहाय्येन हेहयमहपालः परिपूजितः। कार्तवीर्यार्जुनः कामधेनोः सामर्थ्यं वीक्ष्य दुर्मन्त्रिबोधनात् गां क्रेतुं कञ्चित् सचिवं प्राहिणोत्। यदा मुनिना सम्मतिः अदत्ता तदा सः मुनिं हत्वा धेन्वाः वत्सं नीतवान्।

परशुरामे प्रत्यागते सति शुक्रेण जीवितः मुनिः तं सर्वम्, विषयं अश्रावयत्। क्रुद्धः रामः शरान् चापं कुठारं च बिभ्रन् अकृतव्रणमुनिना सह धेन्वाः वत्सम् आनेतुं माहिष्मतीम् ययौ। यदा कार्तवीरर्जुनः वत्सं न प्रत्यर्पितवान् तदा प्रथमं हेहयपुत्राणामयुतेन सह युद्धमकरोत्। ते सर्वे भीत्या पलायितवन्तः। तदनु राज्ञा अर्जुनेन सह युद्धम् आरब्धम्। कार्तवीरार्जुनस्य वैष्णवचक्रे विफले जाते सः ''एषः एव श्री हरिः'' इति विज्ञाय झटिति तं शरणं गतः।

तावति काले आश्रमं गतैः हेहयात्मजैः मुनिः हतः आसीत्। गृहं प्रत्यागतः परशुरामेण मातुः दुःखं दृष्ट्वा प्रतिज्ञातः - ''दिक्चक्रेषु विप्रद्रुहान् क्षत्रियान् मारयित्वा महीं निःक्षत्रियां करिष्यामि।'' इति।

तदनु परशुरामः त्रिःसप्तकृत्वः सर्वत्र अटित्वा सर्वान् राज्ञः पराजित्य युद्धात् व्यरमत्। दशरथ पुत्रः श्रीरामः यदा सम्मुखे आगतवान् तदा एषोऽपि अवतारपुरुषः इति अभिज्ञाय स्वतेजः तस्मै सङ्क्रमय्य परशुरामः तपः कर्तुं महेन्द्रपर्वतं ययौ। पश्चात् यदा गोकर्णपर्यन्तं भूमिः सागरे निमज्जिता तदा तापसैः प्रार्थितः एषः स्रुवक्षेपणात् सागरम् उत्सार्य (भूमिं) उद्धृतवान् इति प्रतीतिः।

**परित्राणाय साधूनां विनाशाय च दुष्कृताम्।**
**धर्मसंस्थापनार्थाय सम्भवामि युगे युगे।।**

**- श्रीमति विजय भट्ट**



# सरस्वतीपूजाविधानम्

लौकिकालौकिक विद्यानां सरस्वतीमाता अधिष्ठात्री। तस्याः अनुग्रहेणैव सर्वविद्याप्राप्तिः। माघशुद्धपञ्चमी एव सरस्वती जन्मदिनम्। एतद्दिनमेव वसन्तपञ्चमीति व्यवहरन्ति। पाठकेभ्यः विद्यार्थिभ्यश्च महासरस्वतीपूजाविधानं सप्तगिरिमासिकी -पत्रिकाग्रन्थः प्रदर्शयति।

सङ्कल्पः -

श्रीमहाविष्णोराज्ञया प्रवर्तमानस्य आद्यब्रह्मणः द्वितीयपरार्थे श्वेत वराहकल्पे वैवस्वतमन्वन्तरी कलियुगेप्रथमपादे जम्बूद्वीपे भरतवर्षे भरतखण्डे अस्मिन्वर्तमानव्यावहारिक चान्द्रमाने स्वस्तिश्री क्रोधिनाम संवत्सरे उत्तरायणे शशिरर्तौ माघमासे शुक्लपक्षे पञ्चमीतिथौ सोमवासरे शुभयोगशुभनक्षत्रे एवं गुण विशेष विशिष्टायां शुभ तिथौ मम (सहकुटुम्बानां) चतुर्विध पुरुषार्थ सिद्ध्यर्थं सकल विद्यापारङ्गत्वार्थं श्रीसरस्वती देवतामुद्दिश्य श्रीसरस्वतीदेवता प्रीत्यर्थं कल्पोक्त प्रकारेण यावच्छक्ति ध्यानावहनादि षोडशोपचारपूजां करिष्ये।तदङ्गत्वेन कलशाराधनं करिष्ये। कलशं गन्ध, पत्र पुष्पाक्षतैः अभ्यर्च्य कलशे हस्तं निधाय -

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रिताः।
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः।
कुक्षौतु सागरास्सर्वे सप्तद्वीपाः वसुन्धरा।
ऋग्वेदोऽथ युजर्वेदः सामवेदोह्यधर्वणः
अङ्गैश्च सहितास्सर्वेकलशाम्बु समाश्रिताः।

कलशोदकेन देवं आत्मानं पूजा द्रव्याणि संप्रोक्ष्य -

(कलशजलं पुष्पेण देवे स्वशिरसि पूजा द्रव्योपरि केशवादिनामोच्चारण पूर्वकं संप्रोक्षणीयम्।

ध्यानम् -

१. पुस्तकेतु यतोदेवीक्रीडते परमार्थता
तत्र तत्र प्रकुर्वीत ध्यानमावाहनादिकम्।
ध्यानमेवं प्रकुर्वीत साधकोर्विजितेन्दियः
प्रणवासनमारूढां तदर्थत्वेन निश्चितम्।।

२.अङ्कुशंचाक्षसूत्रञ्च पाशं वीणाञ्च धारिणीं मुक्ताहारसमायुक्तां मोदरूपां मनोहरीं। कृतेन दर्पणाख्यमेव वस्त्रेणोपरिभूषितां सुस्तनीं वेदवेद्याञ्च चन्द्रार्धकृत शेखराम्। जटाकलापसंयुक्तां पूर्णचन्द्रनिभाननां त्रिलोचनां महादेवीं स्वर्णनूपुरधारिणीं। कटकैस्वर्णरन्त्राद्यैर्युक्तां वलयभूषितां कम्बुकण्ठीं सुताम्रोष्ठीं सर्वाभरणभूषिताम् केयूरमेखलाद्यैश्च



द्योतयन्ती जगत्रर्थीं शब्दब्रह्मात्मिकां देवीं ध्यानकर्मसमाहितः। साङ्गां सायुधां सवाहनां पतिपुत्र परिवारसमेतां श्रीसरस्वत्यै नमः ध्यायामि।

आवाहनम् -

आत्रागछ जगद्वन्द्ये सर्वलोकैक पूजिते
यथा कृतामिमां पूजां गृहाण जगदीश्वरि।
साङ्गां सायुधां सवाहनां पतिपुत्रपरिवार समेतां
श्री सरस्वत्यैनमः आवाहयामि।।

आसनम् -

आवाहिता भावस्थापिता भव सन्निरुद्धाभव, अवकुण्ठिताभव, सुप्रीता भव, सुप्रसन्नाभव, समुमुखी भव, वरदा भव, प्रसीद, प्रसीद।

कनकमयवितर्थिस्थापिते तूलिकाद्ये विविधकुसुमकीर्णे कोटिबालार्कवर्णे भगवति रमणीये रत्न सिंहासनेऽस्मिन् उपविश, पदयुग्मं हेमपीटे निधाय। साङ्गां सायुधां सवाहनां पतिपुत्र परिवार समेतां श्रीसरस्वत्यै नमः नवरत्नखचित सुवर्ण सिंहासनं समर्पयामि।

पाद्यम् -

गन्धपुष्पाक्षतैस्सार्थं शुद्ध तोयेन संयुतं
शुद्धस्फटिकतुल्याङ्गी पाद्यं ते प्रतिगृह्यतां
साङ्गां सायुधां सवाहनां पतिपुत्रपरिवारसमेतां
श्रीसरस्वत्यै नमः पाद्यं समर्पयामि।

अर्घ्यम् -

भक्ताभीष्टप्रदे देवि देवदेवादिवन्दिते
धातृप्रिये जगद्धात्रि ददाम्यर्घ्यं गृहाण मे

साङ्गां सायुधां सवाहनां पतिपुत्र परिवार समेतां श्री सरस्वत्यै नमः अर्घ्यं समर्पयामि।

**आचमनम् -**

पूर्णचन्द्रसमानाभे कोटिसूर्यसमप्रभे
भक्त्या समर्पितं वाणि। गृहाणाचमनीयकम्।
साङ्गां सायुधां सवाहनां पतिपुत्रपरिवारसमेतां
श्रीसरस्वत्यैनमः आचमनीयं समर्पयामि।।

**मधुपर्कम् -**

कमलभुवनजाये कोटिसूर्य प्रकाशे
विशदशुचिविलासे कोमले हारयुक्ते
दधिमधुघृतयुक्तं क्षीररम्भाफलाद्यं
सुरुचिरमधुपर्कं गृह्यतां देववन्द्ये
साङ्गां सायुधां सवाहनां पतिपुत्रपरिवासमेतां
श्रीसरस्वत्यै नमः, मधुपर्कं समर्पयामि।

**पञ्चामृतम् -**

दधिक्षीरघृतोपेतं शर्करामधु संयुतं
पञ्चामृत स्नानमिदं स्वीकुरुष्व महेश्वरि।
साङ्गां सायुधां सवाहनां पतिपुत्रपरिवारसमेतां
श्रीसरस्वत्यै नमः पञ्चामृतस्नानं समर्पयामि।।

**स्नानम् -**

शुद्धोदकेन सुस्नानं कर्तव्यं विधिपूर्वकं
सुवर्णकलशानीतैः नानागन्धसुवासितैः
साङ्गां सायुधां सवाहनां पतिपुत्र परिवारसमेतां
श्रीसरस्वत्यै नमः शुद्धोदक स्नानं समर्पयामि।

**वस्त्रयुग्मम् -**

शुक्लवस्त्रद्वयं देवी कोमलं कुटिलालके
मयि प्रीत्या त्वया वाणि ब्रह्माणि। प्रतिगृह्यतां
साङ्गां सायुधां सवाहनां पतिपुत्र परिवार समेतां
श्री सरस्वत्यैनमः वस्त्र युग्मं समर्पयामि।।

**यज्ञोपवीतम् -**

शब्दब्रह्मात्मिके देवी! शब्दशास्त्रकृतालये
ब्रह्मसूत्रंगृहाणत्वं ब्रह्मशक्रादि पूजिते।
साङ्गां सायुधं सवाहनां पतिपुत्रेपरिवारसमेतां
श्री सरस्वत्यै नमः यज्ञोपवीतं समर्पयामि।।

**आभरणम् -**

कटकमकुटहारैर्नूपुरैरङ्गदाद्यैः
विविधमणियुक्तैर्मेखलारत्नहारैः।
कमलदळविलासे कामदे संगृहीष्व
प्रकटितकरुणार्दे भूरिशो भूषणानि।।
साङ्गां सायुधां सवाहनां पतिपुत्र परिवार समेतां
श्री सरस्वत्यै नमः आभारणानि समर्पयामि।

**गन्धम् -**

चन्द्रनागुरुकस्तूरीकर्पूरैस्च सुसंयुतं
गन्धं गृहाण वरदे विधिपत्नि! नमोऽस्तुते।
साङ्गां सायुधां सवाहनां पतिपुत्र परिवार समेतां
श्रीसरस्वत्यै नमः गन्धं धारयामि।।

**अक्षतानि -**

अक्षतान् धवलान् दिव्यान्शालीतण्डुल निर्मितान्
गृहाण वरदे देवि ब्रह्मशक्तिशुभाक्षतान्।
साङ्गां सायुधां सवाहनां पतिपुत्रपरिवार समेतं
श्री सरस्वत्यै नमः, अक्षतान् समर्पयामि।।

**पुष्पम् -**

नन्द्यावर्तादिपुष्पैश्च मल्लिकाभिर्मनाहरैः
करवीरसुमैः रम्यैर्बकुलैः केतकैः शुभैः
पुन्नागैर्जातिकुसुमैर्मन्दारैश्च सुशोभितैः
नीलोत्पलैः शुभैश्चायैः तत्कालतरु सम्भवैः
कल्पितानि च माल्यानि गृहाणामरवन्दिते।
साङ्गां सायुधां सवानां पतिपुत्रपरिवारसमेतां
श्रीसरस्वत्यै नमः, पुष्पैः पूजयामि।

**अङ्गपूजा -**

श्री ब्रह्मण्यै नमः, पादौ पूजयामि
श्री भारत्यै नमः गुल्फौ पूजयामि
श्रीजगत्स्वरूपिण्यै नमः जंघे पूजयामि
श्रीजगदाद्यै नमः जानुनी पूजयामि
श्री चारुविलासिन्यै नमः उरु पूजयामि
श्रीकमलभूम्यै नमः कटिं पूजयामि
श्रीजन्महीनायैनमः जघनं पूजयामि
श्रीगम्भीरनाभयेनमः नाभिं पूजयामि
श्रीहरिपूजायै नमः उदरं पूजयामि
श्रीलोकमात्रे नमः स्तनौ पूजयामि
श्रीविशालवक्षसे नमः वक्षस्थलं पूजयामि
श्रीज्ञानविचक्षणायै नमः कण्ठं पूजयामि
श्रीस्कन्दप्रपूज्यायै नमः स्कन्दौ पूजायामि
श्रीघनबाहवे नमः बाहून्पूजयामि
श्रीपुस्तक धारिण्यै नमः हस्तौ पूजयामि
श्री श्रोतिय बान्धवे नमः, श्रोत्रं पूजयामि
श्रीवेदस्वरूपायै नमः वक्त्रं पूजयामि
श्रीसुवासिन्यै नमः नासिकां पूजयामि
श्रीबिंम्बसमानोष्ठ्यै नमः ओष्ठे पूजयामि
श्रीकमललोचनायै नमः, नेत्रे पूजयामि
श्री तिलकधारिण्यै नमः फालं पूजयामि
श्रीचन्द्रमूर्त्यै नमः चक्षु पूजयामि
श्रीसर्वप्रदायै नमः, मुखं पूजयामि
श्रीसरस्वत्यै नमः, शिरः पूजयामि
श्री ब्रह्मरूपिण्यै नमः, सर्वाण्यङ्गानि पूजयामि।

# अष्टोत्तरशतनामावाळिः

ओं श्रीसरस्वत्यै नमः
ओं महाभद्रायै नमः
ओं महामायायै नमः
ओं वरप्रदायै नमः
ओं पद्मनिलयायै नमः
ओं पद्माक्ष्यै नमः
ओं पद्मपत्रायै नमः
ओं शिवानुजायै नमः
ओं पुस्तकघृतायै नमः
ओं ज्ञानसमुद्रायै नमः 10
ओं रमायै नमः
ओं परायै नमः
ओं कामरूपायै नमः
ओं महाविद्यायै नमः
ओं महापातकिन्यै नमः
ओं महाश्रयायै नमः
ओं मालिन्यै नमः
ओं महाभोगायै नमः 20
ओं महाभाग्यायै नमः
ओं महोत्साहायै नमः
ओं दिव्याङ्गायै नमः
ओं सुरवन्दितायै नमः
ओं महाकाल्यै नमः
ओं महापाशायै नमः
ओं महाकारायै नमः
ओं महाङ्कुशायै नमः
ओं सीतायै नमः
ओं विमलायै नमः
ओं विश्वायै नमः 30
ओं विद्युन्मालायै नमः
ओं वैष्णव्यै नमः
ओं चन्द्रिकायै नमः
ओं चन्द्रवदनायै नमः
ओं चन्द्रलेखाविभूषितायै नमः
ओं सावित्र्यै नमः
ओं सुरसायै नमः
ओं देव्यै नमः
ओं दिव्यालङ्कारभूषितायै नमः
ओं वाग्देव्यै नमः 40
ओं वसुधायै नमः
ओं तीव्रायै नमः
ओं महाभद्रायै नमः
ओं महाबलायै नमः
ओं भोगादायै नमः
ओं भारत्यै नमः
ओं भामायै नमः
ओं गोविन्दायै नमः
ओं गोमत्यै नमः
ओं शिवायै नमः 50
ओं जटिलायै नमः
ओं विन्ध्यवासिन्यै नमः
ओं चण्डिकायै नमः
ओं वैष्णव्यै नमः
ओं ब्राह्यै नमः
ओं ब्रह्मज्ञानैकसाधनायै नमः
ओं सौदामिन्यै नमः
ओं सुधामर्त्यै नमः
ओं सुभद्रायै नमः 60
ओं सुरपूजितायै नमः
ओं सुवासिन्यै नमः
ओं सुवासायै नमः
ओं विनिद्रायै नमः
ओं पद्मलोचनायै नमः
ओं विद्यास्वरूपायै नमः
ओं विशालाक्ष्यै नमः
ओं ब्रह्मजायायै नमः
ओं महाफालायै नमः
ओं त्रयीमूर्त्यै नमः 70
ओं श्रीविशालाक्ष्यै नमः
ओं ब्रह्मजायायै नमः
ओं महाफलायै नमः
ओं त्रयीमूर्त्यै नमः
ओं त्रिकालज्ञायै नमः
ओं शास्त्ररूपिण्यै नमः
ओं शुम्भासुरप्रमादिन्यै नमः
ओं शुभदायै नमः
ओं सर्वात्मिकायै नमः
ओं रक्तजनिहन्त्र्यै नमः
ओं चामुण्डायै नमः
ओं अम्बिकायै नमः
ओं मुण्डकप्रहरणायै नमः 80
ओं धूमलोचनमर्दनायै नमः
ओं सर्वदेवतास्तुतायै नमः
ओं सौम्यायै नमः
ओं सुरासुरनमस्कृतायै नमः
ओं कालरात्र्यै नमः
ओं कलाधाराय नमः
ओं रूपसौभाग्यदायिन्यै नमः
ओं श्रीवाग्देव्यै नमः
ओं वरारोहायै नमः 90
ओं वाराह्यै नमः
ओं वारिजासनायै नमः
ओं चित्राम्बरायै नमः
ओं चित्रगन्धायै नमः
ओं चित्रमाल्यविभिषितायै नमः
ओं कान्तायै नमः
ओं काम्यप्रदायै नमः
ओं वन्द्यायै नमः
ओं विद्याधरसुपूजितायै नमः
ओं श्वेतासनायै नमः
ओं नीलभूजायै नमः 100
ओं चतुर्वर्गफलप्रदायै नमः
ओं चतुराननसाम्राज्ञै नमः
ओं रक्तमध्यायै नमः
ओं निरञ्जनायै नमः
ओं हंसवाहनायै नमः
ओं नीलजंघायै नमः
ओं श्रीप्रदायै नमः
ओं ब्रह्मविष्णुशिवात्मिकायै नमः 108

साङ्गां सायुथां सवाहनां पतिपुत्रपरिवार समेतां श्रीसरस्वत्येनमः अष्टोत्तरशतपूजां समर्पयामि।

साङ्गां सायुधां सवाहनां पतिपुत्रपरिवारसमेतां श्रीसरस्वत्यै नमः, अष्टोत्तरशतनामपूजां समर्पयामि।

धूपम् -

दशोङ्गं गुग्गुलोपेतं सुगन्धं सुमनोहरं धूपं गृहाण देवेशि। सर्व देवनमस्कृते साङ्गां सायुधां सवाहानं पतिपुत्र परिवार समेतां

श्री सरस्वत्यै नमः धूपमाघ्रापयामि

दीपः -

घृतावर्तिसंयुक्तं दीपितं दीपमम्बिके गृहाण चित्स्वरूपे त्वं कमलासनवल्लभे साङ्गां सायुद्यां सवाहनां पतिपुत्रपरिवारसमेतां

श्रीसरस्वत्यै नमः साक्षाद्दीपं दर्शयामि।

नैवेद्यम् -

अपूपान् विविधान् स्वादून् शालिपिष्टोपपाचितान् मृदुलान् गुडसम्मिश्रान् सजीरसहितान् मरीचिकान्कदलीवनसाघ्राणपक्वानि, सुफलानि च कन्दमूलं व्यञ्जनानि सोपदंशं मनोहरं अन्नं चतुर्विधोपेतं क्षीरान्नञ्च घृतं दधि शीतोदकञ्च सुस्वादु कर्पूरैलादिवासितं भक्ष्यभोज्य समायुक्तं नैवेद्यं पतिगृह्यतां साङ्गां सायुधां सवाहनां पतिपुत्रपरिवार समेतां।मातरं सरस्वतीं क्षीरपायसान्नफलेषु नागवल्लीपत्रेण जलं सिञ्चन् ओं भूर्भवः सुवः इति गायत्रीमन्त्रं पठन्।

श्रीसररस्वत्यै नमः, नैवेद्यं समर्पयामि मध्ये मध्ये पानीयं समर्पयामि उत्तरापोशनं समर्पयामि

हस्तौ प्रक्षलयामि। पादौ प्रक्षालयामि शुद्धाचमनीयं समर्पयामि।

ताम्बूलम् -

ताम्बूलञ्च सकर्पूरं पुन्नागदलैर्युतं गृहाण देवदेवेशि। तत्त्वरूपे नमोऽस्तुते साङ्गां सायुधां सवाहनां पतितुत्र परिवारसमेतां

श्री सरस्वत्यै नमः ताम्बूलं समर्पयामि

नीराजनम् -

नीराजनं गृहण त्वं जगदानन्ददायिनि।
जगत्तिमिरमार्ताण्डमण्डले ते नमो नमः।।

साङ्गां सायुधां सवाहनां पतिपुत्रपरिवार समेतां

श्री सरस्वत्यै नमः, आनन्दकर्पूरनीराजनं समर्पयामि।

पुष्पाञ्जलिः -

शारदे लोकमातस्त्वमाश्रिताभीष्टदायिनि।
पुष्पञ्जलि गृहाण, त्वं मया भक्त्या समर्पितम्।
याकुन्देन्दुतुषारहारधवला या शुभवस्त्रान्विता
यावीणावरदण्डमण्डितकरा या श्वेतपद्मासना।
या ब्रह्माच्युतशङ्कर प्रभृतिभिर्देवैस्सदापूजिता।
सा मां पातु सरस्वती भगवती निश्शेषजाड्यापहा।

साङ्गां सायुधां सवाहनां पतिपुत्र परिवारसमेतां

श्री सरस्वत्यै नमः, मन्त्रपुष्पं समर्पयामि।

प्रदक्षिणम् -

पाहि पाहि जगद्वन्दे नमस्ते भक्तवत्सले नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः। साङ्गां सायुदां सवाहनां पतिपुत्रपरिवार समेतां श्री सरस्वत्यै नमः आत्मप्रदक्षिण समेतां श्री सरस्वत्यै नमः आत्मप्रदक्षिणनमस्कारान् समर्पयामि अधश्श्लोकं पठित्वा चतुर्दश प्रदक्षिणानि अपि कुर्वन्तु।

पाशाङ्कुशधरा वीणा पुस्तकधारिणी
मम वक्त्रे वसेन्नित्यं दुग्धकुन्देन्दुनिर्मला।

चामरम् -

चतुर्दशसुविद्यासु रमते या सरस्वती।
चतुर्दशषु लोकेषु सा मे वाचि वसेत् सदा।।

छत्रं धारयामि चामरं वीजयामि, गीतं नृत्यं दर्शयामि आन्दोलिकामारोपयामि अश्वानारोहयामि, गजानारोहयामि समस्तराजोपचार शक्त्युपचार भक्त्युपचारान् समर्पयामि।

दक्षिण हस्तेन अक्षतानि जलञ्च स्वीकृत्य मातुः देव्याः समर्पणभावनया पात्रे निवेशनीयानि।

अनया ध्यानावाहनादिषोडशोपचारपूजया च साङ्गा सायुधां सवाहनां पतिपुत्र परिवार समेतां श्रीसरस्वति देवता सुप्रीता सुप्रसन्ना वरदा भवतु।

साङ्गां सायुधां सवाहनां पतिपुत्रपरिवारसमेतां श्री सरस्वत्यै नमः। प्रसादं शिरसा गृह्णामि इति पूजाक्षतानि शिरसि प्रकीर्णानि कर्तव्यानि।

श्री न च रघुनाथाचार्यप्रणीता

# श्रीशेषाद्रीशस्तुतिः

## शरणागतिः

व्याख्याता - डा. कन्दाल लक्ष्मीनारायणः
चरवाणी - ९९८५२३७३५३

(तदनन्तरम्)

श्लो.१९.

**शरणीकृताहिधरणीधरस्य तरणीन्दुलोचनभृतः**
**करूणारसैकवरुणालयस्य वरणीयसद्गुणनिधैः।**
**शरणंव्रजामिचरणद्वयं तदरूणाब्जतुल्यसुषमं**
**प्रणतामरौघमणिभृत्किरीट किरणावलीवलयितम्।।**

**ता -** सूर्यचन्द्ररूपनेत्रस्य दयारससमुद्रस्य सर्वाभिलषित सद्गुणराशेः शेषाचलनिवासस्य भगवतः श्रीनिवासस्य वेदपुराणादिषु प्रसिद्धवैभवम् अरूणारविन्दमिव प्रकाशमानं नमस्कारं कुर्वताम् इन्द्रादिदेवानां किरीटेषु खचितानां मणीनां किरणैः परिवृतं श्रीचरणयुगलं रक्षणोपायतया शरणं भजामि।

सु.सौ.व्याख्या - पूर्वस्मिन् श्लोके देवेन्द्रादि पदवीभ्योऽपि उत्कृष्टतमं हरिचरण कैङ्कर्यमेव इत्युक्त्वा, अत्र वेदेतिहास पुराणादिषु प्रस्तुते श्रीमन्नारायण चरणयुगे शरणागतिः अनुष्ठीयते।

शरणीकृत.... धरस्य - ''उपाये गृहरक्षित्रोः शब्दश्शरणम्'' इति शास्त्र वचनानुसारेण शरणशब्दस्य उपायः गृहम् रक्षकः इति त्रयः अर्थाः वर्तन्ते। तेषु अत्र गृहम् इत्यर्थो गृह्यते। पूर्वम् अशरणं पश्चात् शरणं कृतः शरणीकृतः। स च अहिः सर्पः एव धरणीधरः पर्वतः शेषाद्रिः इत्यर्थः।

श्रीवैकुण्ठे श्रीभूदेव्यादिभिः समेतो वासुदेवो भूलोके विहरणं कर्तुम् इच्छन् आदिशेषम् आहूय - हे अनन्त! मम विहारार्थं त्वं भूमौ पर्वतरूपो भूत्वा तिष्ठ इति आदिष्टवान्। स च श्रीहरेः आदेशम् अनुसृत्य तथैव पर्वतरूपं धृतवान्। स एव शेषाचलः। सद्य एव भगवान् वेङ्कटेश्वररूपेण शेषगिरौ अवतीर्य विहरन् अस्ति। तत् उक्तं च ब्रह्माण्ड पराणे -

''तत्र भूत्वा गिरिवरो भवान् वसतु भूतले।
त्वत्फणामण्डल भुवि स्थातव्यरमया सह'' ती.२.२.

इति। ततश्च स्वामिपुष्करिणीतीरे स्वसङ्कल्पागते ततः।। ती ३.५४

**दिव्ये विमाने सर्वेषां विलोचनपथं गतः।**
**श्री भूमिनीलासहितः शङ्खचक्रगदाधरः ती.३.५५**
**कोटिकन्दर्पलावण्यो नीलजीमूतसन्निभः।**
**दयापरवशो नित्यं वसतिप्रीतमानसः।। ती.३.५६.**

इत्युक्तरीत्या हृषीकेशः स्वामिपुष्करिण्याः तटे आनन्दनिलयाख्ये दिव्यविमाने श्रीदेवी भूदेवी नीलादेवी समेतः शङ्खचक्रादि दिव्यायुधधरः दयापरवशः सन् सर्वेषाम् अपि जनानां स्वीयदर्शनम् अनुगृह्ण प्रीत्या शेषाद्रौ विराजते।

**तरणीन्दुलोचनभृतः -** तरणिः सूर्यः द्युमणिस्तरणिमित्रः चित्रभानु र्विरोचनः। अमर-१.३.३० इति निघण्टुः। इन्दुः चन्द्रः। सूर्य चन्द्रौ उभौ अपि भगवतो नारायणस्य नेत्र स्थानीयौ। अयम् अंशः मुण्डकोपनिषदि एवं प्रोक्तः - द्यौर्मूधा चक्षुषी चन्द्रसूर्यौ दिशः श्रत्रे वाग्विवृताश्च वेदाः। ३.४.इति।





**स्मृतिषु अपि एवं प्रस्तुतम् -** ''भूःपादौ यस्यनाभिः वियदसुरनिलश्चन्द्रसूर्यौ च नेत्रे'' इत्यादि। देवदेवस्थ विष्णोः पादौभूमिःनाभिः आकाशः, वायुः प्राणस्थानीयः, सोमभास्करौ नेत्रस्थानीयौ इत्येदं सर्वं जगत् अपि विराट्रूपस्य भगवतः शरीरमेव इति भावः।

करूणारसैकवरूणालपस्य करूणादया। कारूण्यं करुणा घृणा। कृपादयाऽनुकम्पा - १.७.१८ इति अमरनिघण्टुः। दया नाम स्वस्य किमपि प्रयोजनम् अनपेक्ष्य एव अन्येषां दुःखम् अपनेतुम् इच्छा। तादृश दयायाः वरूणालयः नाम सागरः श्रीवेङ्कटपतिः। समुद्रे यथा अपरिमितं जलं वर्तते तथैव श्रीनिवासे एकस्मिन् एव परिपूर्णतया करूणारूपं जलं सुसमृद्धं विद्यते इति स भगवान् वरूणालय सदृशो भवति।

**वरणीयसद्गुणनिधेः -** देवदेवः भक्तजनानाम् अभिलषिताः दयावात्सल्य सौशील्य सौलभ्यादयो भगवदाश्रयणे सौकर्यापादकाः वरगुणाः। अतः ते गुणाः वरणीयाः। तादृशानाम् उत्तमगुणानां निधिः राशिः श्रीनिवासः। तदेव उक्तम् आदित्य पुराणे वेङ्कटाचलमाहात्म्ये -

**गुणैर्घे रपारं स्फुरद्रत्नहारं स्मरद्दोषहारं स्वभक्तेष्टपूरम्।**
**भजे वेङ्कटेशं फणीशाद्रिवासं सदा मन्दहासं श्रिया सद्विलासम्।। - ३.३९**

-अपरिमितसद्गुणनिधिं रत्नहारैः प्रकाशमानं, स्मरतां भक्तानां दोषान् हरन्तं, भक्तेभ्यः अभीष्टफलप्रदातारं, शेषाद्रिनिलयं, सदा मन्दहासेन विराजमानं श्रीदेवी समेतं वेङ्कटेशं भजामि इति अत्र स्वामिनः अनन्तकल्याणगुणराशिः प्रस्तूयते।

**एवमेव श्रीयामुनाचार्याः -** वशीवदान्यो गुणवान् ऋजुश्शुचिः ...... स्वभावतस्समस्त कल्याणगुणामृतोदधिः - स्तो.र.१८. इति स्वामी सकलकल्याण गुणानां रत्नाकरः इति प्रास्तुवन्। तत् अरुणाब्जतुल्यसुषमम् - तत् इति पदं वेद इतिहास पुराणादिषु प्रसिद्धं भगवतः श्रीचरणवैभवं सूचयति। तद्धियजुर्वेद ब्राह्मणे - उरुक्रमस्य सहिबन्धु रीत्या विष्णोः पदे परमे मध्व उत्सः'' त्रिविक्रमस्य विष्णोः आराधकः तस्य प्रियो बन्धु रेव। स एव मधुवत् भोग्ये उत्कृष्टे विष्णुपादे उत्साहवान् भवति - इति श्रीमन्नारायण चरणौ भक्तानाम् अत्यन्त प्रीतिकरौ इति प्रोक्तम्।

एवं श्रीमद्भागवतमहापुराणे -

**यच्छौचनिस्सृत सरित्प्रवरोदुकेन**
**तीर्थेन मर्ध्न्यधिकृतेन शिव श्शिवोऽभूत्।**
**ध्यातुर्मनश्शमलशैल निसृष्टवज्रं**
**सञ्चिन्तयेत् भगवतश्चरणारविन्दम्।।**

भगवतः त्रिविक्रमस्य पादप्रक्षालन पवित्रजलेन हरः शिवत्वं प्राप्तः, तादृशं भक्तानां पापराशि निर्मूलन समर्थं भगवच्चरणारविन्दं सर्वदा ध्यातव्यम् इति च तद्वैभवं प्रकीर्तितम्। श्रीहरेः तादृशं श्रीपादयुग्मं अरूणवर्णपद्मसमानकान्त्या प्रकाशते। प्रणतामरौद्य..... वलयितम् - श्रीनिवासस्य चरणयुगलं नमस्कुर्वतां देवसमूहानां किरीटेषु स्थगितानां मणीनां प्रभाभिः समावृतं भवति। सर्वेऽपि देवाः नित्यं शेषाचलमागत्य तत्र विलसतः पद्मावतीजानेः चरणौ प्रणमन्तीति तात्पर्यम्। लक्ष्मीदेवी प्रभृतयः सकलाः सुराः श्रीवेङ्कटेशस्य चरणौ वन्दन्ते इति श्रीवेङ्कटाचलमाहात्म्ये उद्गीतम् एक्म् -

**वेङ्कटेश! चरणौ तव वन्दे सर्वतीर्थ शरणौ शरणौ मे।**
**माविधातृ शिव ईश फणीशेन्द्रार्कसोमहुतभुङ्खवन्द्यै।।**

- हे श्रीनिवास! सकललीर्थानां निवासभूतौ लक्ष्मी चतुर्मुख शिव गरूड अनन्त इन्द्रसूर्य चन्द्र अग्निप्रभृतिभिः दैवैः सदा वन्दनीयौ मम रक्षणोपायभूतौ तव श्रीचरणौ प्रणमामि इति भावः।

एवमेव शठकोपसूरिभिरपि प्रस्तुतोऽयम् अंशः -

''मलरमगळ विरूम्बुजम् अपेक्षमाणौ भगवच्चरणौ।

''निगरिल् अमरर मुनिक्कणङ्गळ् विरूम्बुम् तिरूवेङ्गडत्ताने - ति.मो.६.१०.१० -अनुपमानैः सुरश्रेष्ठैः मुनिभिश्च प्राप्यतया अपेक्षित! श्रीवेङ्कटेश! इत्यर्थः शरणं व्रजामि चरणद्वयम् शेषाचलाधिपतेः श्रीनिवासस्य चरणयुगलं शरणं प्राप्नोमि इत्यर्थः। अत्र शरणम् इति पदस्य पूर्वोक्तरीत्या रक्षकत्व भावनया अथवा मुक्तिप्राप्तेः उपायत्व चिन्तया इति वा अर्थोग्राह्यः। शरणागतिः नाम भगवति आनुकूल्य भावादि षडङ्ग सहितं स्वात्मनो दासभावनया भगवति समर्पणम्। तादृशी शरणागतिः अत्र अनुष्ठीयते। इयमेव द्वयमन्त्रे ''श्रीमन्नारायणचरणौ शरणं प्रपद्ये'' इति पूर्ववाक्येन उपदिश्यते। इदमेव च श्रीशङ्कर भगवत्पादैः प्रस्तुतं षट्पदीस्तोत्रे - ''नारायण! करूणाकर! शरणं करवाणि तावकौ चरणौ'' - इति

अयं श्लोकः आचार्यपादैः मणिमालिका नामके विलक्षण वृत्ते निबद्धः। तच्च वृत्तं क्रमेण सजसजसज सगणैः विशिष्टतया लक्षितम्।।

(अनुवर्तिष्यते)



# कडप श्रीलक्ष्मीवेङ्कटेश्वरालय ब्रह्मोत्सवाः

- डा एम्.ईश्वरम्म, चरवाणी - ८१०६५७८२५०

## देवुनिकडप श्रीलक्ष्मीवेङ्कटेश्वरस्वामिनां ब्रह्मोत्सवः

**29-01-2025 तिथौ बुधवारे आरब्धः 08-02-2025 तिथौ शनिवारे समाप्यते।**

दक्षिणभारतदेशे तिरुमल श्रीवेङ्कटेश्वरालय प्रामुख्यं उत्सव वैभवं दिनदिन प्रवर्धमानं विज्ञाय तमिलकर्णाकान्ध्र-केरलप्रान्तेभ्यः उत्तरभारतात् च असंख्याकभक्ताः तिरुमलपुण्यक्षेत्रं दर्शनार्थमागच्छन्ति। वेङ्कटेस्वरालयाः बहवः निर्मिताः। तिरुपति समीपे श्रीनिवासमङ्गापुरम् अप्पलायगुण्ट, नारायणवनालयाः गणनीयाः। एवमन्यमण्डलेष्वपि वेङ्कटेश्वरालयाः निर्मिताः। एतेषु रायलसीमकेन्द्रस्थान कडप श्रीलक्ष्मीवेङ्कटेश्वरालयः एकः। भक्ताः तिरुपति यात्रायां अनन्तपूर कर्णूल् बल्लारि, कन्नडीयाः स्वयात्राभागत्वेन देवुनिकडप श्रीलक्ष्मीवेङ्कटेश्वरस्वामि दर्शनम् विशेषः। उगादिपर्व दिने महाम्मदीयाः अस्मिन्नालये लक्ष्मीं बीबीनाञ्चारम्मेति भावयन्ति श्रीवेङ्कटेश्वरं स्वाजाति जामातारं भावयन्ति। अयं संप्रादयः अन्यत्र न दृश्यते।

कडपलक्ष्मीवेङ्कटेश्वरस्वामिसम्बन्धसाहित्यमप्यपारं दृश्यते। तेषु विशिष्यताल्लपाकपदकवीनां सङ्कीर्तनानि गणणीयानि। पदकवितापितामहः अन्नमय्य एतत्क्षेत्र दर्शनञ्च करोति श्रृङ्गराध्यात्मिक सङ्कीर्तनानि पशिीलनात् ज्ञायते। अन्नमाचार्यानन्तरं श्रीलक्ष्मीवेङ्कटेश्वरस्वामिदर्शनं कृत्वा तिरुमलगमनं एकः सम्प्रदायः परम्परया आगच्छति। तिरुमल सप्तशैलानां कडपश्रीलक्ष्मीवेङ्कटेश्वरालयस्य समीपे विद्यमानवात् कडप गडप इत्यपि व्यवह्रियते। कडपपट्टणस्य ३ किमी दूरे अयं लक्ष्मीवेङ्कटेश्वरालयः वर्तते। तिरुमलक्षेत्रस्य अयं प्रदेशः गडपः पश्चात् कडप इति व्यवह्रियमाणः आसीदित्यैतिह्यम्। श्रीमद्रामयणकाले एव इदं क्षेत्रं हनुमत्क्षेत्रमिति प्रख्यातिमवाप। परन्तु द्वापरयुगे कुरुक्षेत्र संग्रामानन्तर कृपाचार्यः इदं क्षेत्रं सञ्चारसमये आगतः इति, पश्चात् पुरोगन्तुमशक्तः दैवप्रार्थनाञ्चकरोति ततः श्रीनिवास दर्शनमभूदिति वदन्ति। कृपाचार्यः एव हनुमदालयस्य पुरतः अर्चामूर्तिं प्रतिष्ठितवानित्यैतिह्यं वर्तते। अन्ये केचित् जनमेजय महाराजः अर्चामूर्तिं प्रतिष्ठितवानिति वदन्ति।

तिरुपति पट्टणे कोदण्डरामस्वम्यालयोऽपि जनमेजय प्रतिष्ठितः इत्यपि ऐतिह्यं वर्तते। प्राचीनालयः इति वक्तुमपि



आलयस्य जनमेजयसम्बन्धः कल्पितः स्यात्। चारित्रिका धारात् अयमालयः विजयनगर राजपालनकाले पुनरुद्धृतः इति वक्तुं शक्यते। विजयनगर राजप्रमुखः श्रीकृष्णदेवरायः १५०९-१५२९ मध्यकाले कडप पट्टणमागत्य अत्र स्वामि दर्शनं कृत्वा स्वामिने बहुधनं समर्पितवानित्या धाराः वर्तन्ते। सिद्धवटपालकः अनन्तभूपालोऽपि आलयस्य नवीनीकरणञ्चकार। एतदालयपुनरुद्धरणे तत्कालीनस्य दत्तमण्डलकलेक्टरुकृषिरपि गणनीयः एव। एवं आयमालयः प्रभुत्वाधीनमागतः। स्थानिककानां प्रयत्नेन तिरुमलतिरुपतिदेवस्थानाधिकाराधीनमागतः। दर्शनीयस्य अस्य आलयस्य १९८७ वर्षे कुम्भाभिषेकः सम्पन्नः। अस्मिन् सन्दर्भे एव पश्चिमोत्तरप्राकूदिक्सु गोपुराणि निर्मितानि। २००६ वर्षानन्तरं अत्र बहुविध निर्माणकार्यकमाः प्रचलिताः। आलय परिसरप्रान्ते प्रौढदेवरायनिर्मित हनुमत्पुष्करिणी, पुष्करिणी मध्ये शिव पावती पुत्रविनायकविग्रहः बहुमनोहरः शैववैष्णवसमैक्यतां निरूपयति। आत्र आण्डाल् सन्निधिरपि दर्शनीयो पालयः। अत्र अनेकमण्टपेषु रङ्गमण्टपः एकः। अस्मिन् मण्टपे श्रीवेङ्कटेश्वरस्वामिकल्याणघट्टसम्बन्ध बहुशिल्प निर्मितयः द्दश्यते। अत स्तम्भेषु बहुदेवतामूर्तयः शिल्पिभिः निर्मिताः दृश्यन्ते। तासु श्रीवेङ्कटेश्वरेण शिवलिङ्गपूजा मूर्ति शिल्पमपि दृश्यते। अत्र श्रीवेङ्कटेश्वरस्वामी हस्तद्वये शंखचक्रधारी, भवति। अधः हस्तौ वरदकटि हस्ताविव दृश्यन्ते अत्र स्वामी प्रत्यक्षदर्शीव दृश्यमानः आश्चर्यजनको भवति। अत्र महालक्ष्मीदेव्यालयोऽपि दर्शनीयः।

अत्र विद्यमाने गोपुर चतुष्टये राजगोपुरं ९६० अङ्गुल औन्नत्यं दृश्यते। इदं गोपुरं तिरुपति गोविन्दराज स्वाम्यालयगोपुर निर्माणकाले एव निर्मितमिति महता वचनम्। अस्मिन्नालये सन्तानवृक्षः एकः वर्तते। सन्ततिविहीनाः एतच्छनिवृक्षसेवया परितः भ्रमणात्, सन्तानं प्राप्स्यन्ति इति प्रजाविश्वासः अस्मिन्नालये उत्सवाः ति.ति. देवस्थानधिकारिभिः सुसम्यक् निर्वाह्यन्ते। अत्र निर्वाह्यमानेषु ब्रह्मोत्सवेषु षष्ठदिने कल्याणोत्सव निर्वाहः विशिष्टः। सत्पमदिने रथोत्सवः निर्वाह्यते। लक्षशः जनाः रथोत्सव दर्शनार्थमागच्छन्ति रथाकर्षणे तत्प्रान्तीयाः महोत्साहेन भागस्वामिनः भवन्ति।

ताल्लपाकान्नमय्य पौत्रः चिन्नतिरुमलाचार्यः अत्रैव वर्षपर्यन्तमुषित्वा स्वामिनं सेवतेऽस्मेति स्तष्टं ज्ञायते। तस्य सङ्कीर्तनराशौ १० कीर्तनाः कडपलक्ष्मी वेङ्कटेश्वर स्वामिसम्बन्धिनः एव। ताल्लपाकपदसाहित्ये ‘‘कन्नुलपण्डुगाये कडपरायनिपेरु’’ इति कीर्तना सुप्रसिद्धिङ्गता। एते कवयः मधुरभक्त्या बहुश्रृङ्गारकीर्तनाः रचयामासुः भक्ति दृष्ट्या एव ताः कीर्तनाः परिशीलनीयाः। ‘‘कप्पुरमन्दुकोन्टि कडपरायगप्पुमुमाजव्वनमु कडपराय’’ इति कथन सर्वसमर्पणः भावः। द्योत्यते। आन्ध्रपदकवीनां प्रसिद्धः क्षेत्रय्य ‘‘इन्दुवदन! कडप वेङ्कटेशुडेन्तदूरान उन्नाडो इति अभिनयात्मकपदमपि प्रयुयोज। एवं कडप लक्ष्मी वेङ्कटेश्वरालयः प्राचीनः ति.ति.देवस्थानाधीने पर्यवेक्षणे पक्षमासवार्षिक ब्रह्मोत्सवैः भक्ताकर्षकः विराजते।

अखिलभुवन जन्मस्थेम भङ्गादिलीले विनतविविधभूतव्रातरक्षैक दीक्षे।
श्रुतिशिरसिविदीप्ते ब्रह्मणि श्रीनिवासे भवतु मम परस्मिन् शेमुषी भक्तिरूपा।।





# गुरुशुश्रूषया विद्या

- डा.पि.माधवी
चरवाणी - ८५१९८०४७८४

पुरा जबाला नाम्नी ब्राह्मणस्त्रीरासीत् तस्याः विवाहेन बिना एकः बालः देवतावरप्रसादजायत। तस्य पुत्रस्य जाबालिरिति नामकरणं कृतम्। माता, वात्सल्येन पुत्रं पोषयन्ती युक्तवयसि हरिद्रुमन्नामगुरुसकाशं विद्याभ्यासार्थं प्रेषयामास। गुरुशुश्रषया बालकः कालं यापयति स्म।

कदाचिद्गुरुः जाबालेः उपनयनं कर्तुं निश्चित्य कुलगोत्र - नामान्यपृच्छत्। जाबालिः मम कुलगोत्रे नाहं जानामीति गुरोरनुमत्या मातृसकाशं गत्वा मातरं स्वकुलगोत्रे अपृच्छत्। माता स्वनाम सत्यकामः इति गुरुमधिकृत्य, वक्तव्यमिति प्रोवाच। जाबालिः तथैव मम नाम सत्यकामः इति मातृवचनानुसारमुवाच। गुरुः दिव्यदृष्ट्या तन्मातृवृत्तान्तं सर्वं विवेद। सन्तुष्टः गुरुः जाबालेः उपनयनं कारयित्वा गायत्र्युपदेशञ्चकार। ततः जाबालिः तृणक्षेत्रेषु गाः तृणाहारेण पोषयन् कालं यापयति स्म।

सत्यकामपर्यवेक्षणे गोसंख्या अभिवृद्धा। गावश्च सुखेन परिवर्धन्तेऽस्म। सत्यकामः गुरुसेवां गोसेवां सम्यगाचरन् देवतानामभिमतो जातः। सन्तुष्टाः सर्वेदेवाः तस्य उपकर्तुं कदाचित् वायुदेवं प्रेषयामासुः। वायुः वृषभमावेश्य हे जाबाले। त्वं गुरुगोगणं बहुश्रद्धया वर्धयसि। एतदर्थं मन्त्रोपदेशं करोमीति श्रद्धया शिष्यं श्रोतव्यमिति ब्रह्मज्ञानस्य बोधकदिव्यमन्त्रस्य पादं उपदिदेश। अग्निदेवः अन्यवृषभमावेश्य द्वितीयपादं, सूर्यः वृषभमावेश्य तृतीयपादं, एकः पक्षी चतुर्थपादं उपदिदिशुः।शिष्यः जाबालिः मन्त्रपादचतुष्टयोपदेशात् ब्रह्मज्ञान तेजस्सम्पन्नः बभूव गुरुः सर्वं ज्ञात्वा सत्यकामाय शुभाशीर्ददौ।

ततः सत्यकामः गुरुदैवबलात् आश्रमं निर्मीय सुब्रह्मण्यस्वामिनमाराध्य तद्दयापात्रः बभूव। परतत्त्वरहस्यं सर्वं विवेद। इमं विषयं ज्ञात्वा पैप्पलादनामकः ऋषिः जाबालिमाश्रित्य बह्वध्यात्मविद्या-रहस्यानि जज्ञे। तदेव जाबाल्युपनिषदिति प्रस्तूयते। पित्राज्ञापालकाय श्रीरामाय वनवासकाले जाबालिः नास्तिकविषयान् बोधयित्वा राज्यपालनं सुखजीवनं कर्तुं रामं परीक्षितुमेव बोधयामास। जाबालिः न नास्तिकः परमास्तिकः इति वशिष्ठः एव महर्षिं जाबालिं प्राशशंस। पुरा ऋतुम्भरनामक राजा बहुभार्या युतोऽपि अनपत्यः जाबालिं पुत्रसन्तत्युपायम पृच्छत्। तदनुसृत्य राजा सत्पुत्रवान् बभूव। सत्यकामः जाबालिः रामभक्तः धर्मप्रियोभूत्वा विशेषख्यातिमवाप। एवं कन्यायाः पुत्रः दैववरप्रसदलब्धः गुरुदैवकारुण्यात् महर्षिर्बभूव। आस्तिकोऽपि रामाय परीक्षितुं नास्तिकत्वमुपदिश्य रामाशयं ज्ञात्वा तदाशयः एव समुचितः इति प्रोवाच। पवित्रजाबाल्यादर्श कथा अदर्श पठनप्रचारात् सर्वे धन्याः भवेयुः।

नीति : - गुरुशूश्रषया विद्या सत्सङ्गत्या सर्वसिद्धिः।

चित्रकथा

# भक्त्या असाध्यं किमपि नास्ति

तेलुगुमूलम् -डा.कम्पेल्ल रविचन्द्रन्
चित्राणि - तुम्बलि शिवाजी
संस्कृतानुवादः - डा.के .सूर्यनारायणरेड्डि
चरवाणी - ८१०६५७८२५०





शिवदत्ताम्रफलं दृष्ट्वा पुनीतवत्याः भर्ता विचारे निमग्नः आसीत्।
दैवांशसम्भूतया अनया कथमहं लौकिकसम्बन्धैः वर्तिष्यामि। अतः वाणिज्यार्थमिति उक्त्वा पाण्ड्य-देशं गमिष्यामि।
जामाता अन्यस्मिन् ग्रामे स्थिरनिवासी बभूवेति ज्ञात्वा पुनीतवतीपिता स्वपुत्रीं मौक्तकान्दोलिकायां नीत्वा पाण्ड्यदेशं गतः।
परन्तु पुनीतवतीभर्ता स्वनिवासप्रदेशे अन्यां युवतिं परिणिनाय। तस्याः जातायाः पुत्रिकायाः पुनीतवतीति नामकरणश्चकार।
परमेश्वर! मद्भर्तुकृते शरीरं सौन्दर्यञ्च रक्षामिस्म तेन भर्त्रा एव निराकृतः अहम्। किमर्थमिदं मम शरीरसौन्दर्यम्? मां योगिनीव परिणमय्य योगिनीरूपं देहि।
पुनीतवती वृद्धा जाता शिवयोगिनीव परिणता।
हे शिव! शरीरेणैव कैलासमागच्छामि। दर्शनयोग्यं प्रसादय
पार्वति! आवयोः पूजासेवाकारिणी आवयोः माता आगता पश्य।
मातः! कथय किमिच्छसि?
देव! भवन्नामस्मरणम्, भवत्सान्निध्यञ्च शाश्वतं प्रदेहि अनुगृह्णीष्व।
पुनरागता कारैक्कालमाता अलङ्क्काडुप्रदेशे सायं सायं शिवनृत्यं प्रत्यक्षं पश्यन्ती तं कीर्तयन्ती धन्या बभूव। शरीरेण सह कैलासं गत्वा शिवेन मातेति आहूयमाना। पश्चात्पुनरागतायाः अस्याः भक्तिमत्याः कथा शिवरात्रिपर्वदिने स्मरतां सर्वेषां कामाः परिपूर्णाः भवेयुः।



प्रदत्तं चित्रपटम् बिन्दुसाहाय्येन पूरयामः वा?

अस्य चित्रपटस्य रञ्जनं कुर्मः वा?

बा
ल
वि
नो
दि
नी










अ. रथसप्तमी
आ. महाशिवरात्रिः
इ. वसन्तपञ्चमी

उचित समाधान सङ्ख्या कोशे लिखन्तु।





मार्गं अण्विषन्तु

त्रिषु अभिषेक द्रव्येषु किम् शिवलिङ्गं प्राप्स्यति।







चित्राणि क्रमसंख्यापद्धतौ निक्षिप्य कथां ज्ञात्वा नीतिं जानन्तु।

आलस्यमेव अमृततुल्यम्।

समाधानानि : - चित्र क्रम संख्या - ३,१,४,२



Printed by Sri P. Ramaraju, M.A., and Published by Dr. K. Radha Ramana, M.A., M.Phil., Ph.D.,P.G.Dip.in Epigraphy, Dip. in Yoga ,on behalf of Tirumala Tirupati Devasthanams and Printed and Publised at Tirumala Tirupati Devasthanams Press, K.T. Road,Tirupati 517 507. Editor : Dr.V.G. Chokkalingam, M.A., Ph.D.

तिरुमलतिरुपतिदेवस्थानानि

## श्रीनिवासमङ्गापुरस्थ श्रीकल्याणवेङ्कटेश्वरस्वामिनः ब्रह्मोत्सवः

### २०२५ फिब्रवरी १७ तः २६ पर्यन्तम्



**१७-०२-२०२५, इन्दुवासरः**
प्रातः - —
रात्रौ - अङ्कुरार्पणम्

**१८-०२-२०२५, भौमवासरः**
प्रातः - तिरुच्चि उत्सवः, ध्वजारोहणम्
रात्रौ - महाशेषवाहनम्

**१९-०२-२०२५, सौम्यवासरः**
प्रातः - लघुशेषवाहनम्
रात्रौ - हंसवाहनम्

**२०-०२-२०२५, बृहस्पतिवासरः**
प्रातः - सिंहवाहनम्
रात्रौ - मौक्तिकमण्टपवाहनम्

**२१-०२-२०२५, भृगुवासरः**
प्रातः - कल्पवृक्षवाहनम्
रात्रौ - सर्वभूपालवाहनम्

**२२-०२-२०२५, मन्दवासरः**
प्रातः - आन्दोलिकायां मोहिन्यवतारः
रात्रौ - गरुडवाहनम्

**२३-०२-२०२५, भानुवासरः**
प्रातः - हनुमद्वाहनम्,
सायम् - वसन्तोत्सवः
रात्रौ - गजवाहनम्

**२४-०२-२०२५, इन्दुवासरः**
प्रातः - सूर्यप्रभावाहनम्
रात्रौ - चन्द्रप्रभावाहनम्

**२५-०२-२०२५, भौमवासरः**
प्रातः - रथोत्सवः
रात्रौ - अश्ववाहनम्

**२६-०२-२०२५, सौम्यवासरः**
प्रातः - आन्दोलिकोत्सवः, तिरुच्चि उत्सवः, तीर्थावभृतस्नानोत्सवः, चक्रस्नानम्
रात्रौ - तिरुच्चि उत्सवः, ध्वजावरोहणम्

तिरुमलतिरुपतिदेवस्थानानि

## तिरुपतिस्थ श्रीकपिलेश्वरस्वामिनः ब्रह्मोत्सवः

### २०२५, फिब्रवरि १८ तः २८ पर्यन्तम्

**१८-०२-२०२५, भौमवासरः**
प्रातः - —
रात्रौ - अङ्कुरार्पणम्

**१९-०२-२०२५, सौम्यवासरः**
प्रातः - ध्वजारोहणम्
रात्रौ - हंसवाहनम्

**२०-०२-२०२५, बृहस्पतिवासरः**
प्रातः - सूर्यप्रभवाहनम्
रात्रौ - चन्द्रप्रभवाहनम्

**२१-०२-२०२५, भृगुवासरः**
प्रातः - भूतवाहनम्
रात्रौ - सिंहवानहम्

**२२-०२-२०२५, मन्दवासरः**
प्रातः - मकरवाहनम्
रात्रौ - शेषवाहनम्

**२३-०२-२०२५, भानुवासरः**
प्रातः - तिरुच्चि उत्सवः
रात्रौ - अधिकारनन्दिवाहनम्

**२४-०२-२०२५, इन्दुवासरः**
प्रातः - व्याघ्रवाहनम्
रात्रौ - गजवाहनम्,

**२५-०२-२०२५, भौमवासरः**
प्रातः - कल्पवृक्षवाहनम्
रात्रौ - अश्ववाहनम्

**२६-०२-२०२५, सौम्यवासरः**
प्रातः - रथोत्सवः (भोगि तेरु)
रात्रौ - नन्दिवाहनम्, (महाशिवरात्रिः)

**२७-०२-२०२५, बृहस्पतिवासरः**
प्रातः - पुरुषमृगवाहनम्
रात्रौ - (कल्याणोत्सवः) तिरुच्चि उत्सवः

**२८-०२-२०२५, भृगुवासरः**
प्रातः - सूर्यप्रभवाहने नटराजस्वामिनः त्रिशूलस्नानम्
रात्रौ - ध्वजावरोहणम्, रावणासुरवाहनम्



SAPTHAGIRI (SANSKRIT) SPIRITUAL ILLUSTRATED MONTHLY PUBLISHED BY
TIRUMALA TIRUPATI DEVASTHANAMS PRINTING ON 25-01-2025 & posting at Tirupati
RMS Regd.with the Registrar of Newspapers for India under RNI No.21138/1970 Postal
Regd. No. TRP/154/2024-2026" LICENCED TO POST WITHOUT PREPAYMENT
No.PMGK/RNP/WPP-04(4)/2024-2026" Posting on 5th of every month.

